श्री बगळामुखी स्तोत्रं

श्री बगळामुखी स्तोत्रं

ॐ अस्य श्रीबगळामुखीस्तोत्रस्य-नारदऋषिः श्री बगळामुखी देवता- मम सन्निहितानां विरोधिनां वाङ्मुख-पदबुद्धीनां स्तंभनार्थे स्तोत्रपाठे विनियोगः

मध्येसुधाब्धि मणिमंटप रत्नवेदि
सिंहासनोपरिगतां परिपीतवर्णां |
पीतांबराभरण माल्यविभूषितांगीं
देवीं भजामि धृतमुद्गरवैरि जिह्वां || 1 ||

जिह्वाग्रमादाय करेण देवीं
वामेन शत्रून् परिपीडयंतीं |
गदाभिघातेन च दक्षिणेन
पीतांबराढ्यां द्विभुजां भजामि || 2 ||

चलत्कनककुंडलोल्लसितचारुगंडस्थलां
लसत्कनकचंपक द्युतिमदिंदुबिंबाननां |
गदाहत विपक्षकां कलितलोलजिह्वांचलां
स्मरामि बगळामुखीं विमुखवाङ्मनस्स्तंभिनीं || 3 ||

पीयूषो दधिमध्यचारु विलस द्रक्तोत्पले मंटपे
सत्सिंहासन मौळिपातितरिपुं प्रेतासनाध्यासिनीं |
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां
इत्थं ध्यायति यांति तस्य विलयं सद्योथ सर्वापदः || 4 ||

देवित्त्वच्चरणांबुजार्चनकृते यः पीत पुष्पांजलीन्
भक्त्या वामकरे निधाय च मनुं मंत्री मनोज्ञाक्षरं |
पीठध्यानपरोऽथ कुंभकवशाद्बीजं स्मरेत्पार्थिव-
स्तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् || 5 ||

वादी मूकति कंकति क्षितिपतिर्वैश्वानरश्शीतिति
क्रोधीशाम्यति दुर्जनस्सुजनति क्षिप्रानुगः खंजति |
गर्वी खर्वति सर्वविच्च जडति त्वद्यंत्रणा यंत्रितः
श्रीनित्ये बगळामुखि प्रतिदिनं कल्याणि तुभ्यं नमः || 6 ||

मंत्रस्तावदयं विपक्षदलने स्तोत्रं पवित्रं च ते
यंत्रं वादिनियंत्रणं त्रिजगतां जैत्रं च चित्रं च ते |
मातः श्रीबगळेति नाम ललितं यस्यास्ति जंतोर्मुखे
त्वन्नामग्रहणेन संसदि मुख स्तंभो भवेद्वादिनां || 7 ||

दुष्टस्तंभनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृद्भीशमनं चलन्मृगदृशां चेतस्समाकर्षणं |
सौभाग्यैकनिकेतनं समदृशः कारुण्यपूर्णामृतं
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः || 8 ||

मातर्भंजय मे विपक्षवदनां जिह्वां च संकीलय
ब्राह्मीं मुद्रय नाशयाशुधिषणामुग्रां गतिं स्तंभय |
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौरांगि पीतांबरे
विघ्नौघं बगळे हर प्रणमतां कारुण्यपूर्णेक्षणे || 9 ||

मातर्भैरवि भद्रकाळि विजये वाराहि विश्वाश्रये
श्रीविद्ये समये महेशि बगळे कामेशि रामे रमे |
मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहिमां || 10 ||

संरंभे सौरसंघे प्रहरणसमये बंधनेवारिमध्ये
विद्यावादेविवादे प्रतिकृतिनृपतौ दिव्यकाले निशायां |
वश्ये वा स्तंभने वा रिपुवधसमये निर्जने वा वने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः || 11 ||

त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी
योषाकर्षणकारिणी त्रिजगतामानंदसंवर्धिनी |
दुस्फोटोच्चाटनकारिणी जनमनस्संमोहसंदायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मास्त्रमंत्रो यथा || 12 ||

विद्यालक्ष्मीस्सर्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः |
मानो भोगो वश्यमारोग्यसौख्यं
प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण || 13 ||

यत्कृतं च जपं होमं गदितं परमेश्वरी |
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते || 14 ||

पीतांबरां तां द्विभुजां त्रिनेत्रां गात्रगोज्ज्वलां |
शिलामुद्गरहस्तां च स्मरेत्तां बगळामुखीं || 15 ||

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतं |
गुरुभक्ताय दातव्यं नदेयं यस्य कस्यचित् || 16 ||

नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादरात्
धृत्वायंत्रमिदं तथैव समरे बाहौ करे वा गळे |
राजानोऽप्यरयो मदांधकरिणस्सर्पा मृगेंद्रादिकाः
ते वै यांति विमोहिता रिपुगणा लक्ष्मीः स्थिरास्सिद्धयः || 17 ||

इति श्री रुद्रयामळे तंत्रे श्री बगळामुखी स्तोत्रं ||